[७६८] स्वरो रोहतौ छन्दस्युत्वं वक्तव्यम् । (म.भा. ३. १७५)

'[1]जाय एहि सुवो रोहाव' (तै.सं. १.७.९.१) ।

[७६९] पीवोपवसनादीनां च लोपो वक्तव्यः । (म.भा. ३.१७५)

'पीवोपवसनानाम्' (ऋ. खि. ५.७.२) । [2]पयोपवसनानाम् ।

वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ ।
धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम् ॥

## सङ्ख्याविसायपूर्वस्याह्नस्याहन्नन्यतरस्यां ङौ । (११०/२३८)

सङ्ख्या वि साय इत्येवंपूर्वस्य अह्न[3]शब्दस्य स्थाने अहन् इत्ययमादेशो भवत्यन्यतरस्यां ङौ परतः । द्वयोरह्नोर्भवः द्व्यह्नः । त्र्यह्नः । द्व्यह्नि, द्व्यहनि । त्र्यह्नि, त्र्यहनि । द्व्यह्ने । त्र्यह्ने । व्यपगतमहः व्यह्नः । व्यह्नि, व्यहनि, व्यह्ने । सायमह्नः सायाह्नः । सायाह्नि, सायाहनि, सायाह्ने । एकदेशिसमासः पूर्वादिभ्योऽन्यस्यापि भवति इत्येतदेव विसायपूर्वस्य अह्नस्य ग्रहणं ज्ञापकम् । तेन मध्यमह्नः मध्याह्नः इत्यपि भवति । सङ्ख्याविसायपूर्वस्य इति किम् ? पूर्वाह्णे । अपराह्णे ॥

## ढ्रलोपे पूर्वस्य दीर्घोऽणः । (१११/१७४)

ढकाररेफयोः लोपः यस्मिन् स ढ्रलोपः, तत्र पूर्वस्याणः दीर्घो भवति । लीढम् । मीढम् । [4]उपगूढम् । मूढः । रलोपे – [5]नीरक्तम् । अग्नीरथः । इन्दूरथः । पुना रक्तं वासः । प्राता राजक्रयः । पूर्वग्रहणमनुत्तरपदेऽपि पूर्वमात्रस्य दीर्घार्थम् । अणः इति किम् ? [6]आतृढम् । आवृढम् ॥

## सहिवहोरोदवर्णस्य । (११२/२३८७)

सहि वहि इत्येतयोः अवर्णस्य ओकार आदेशो भवति ढ्रलोपे । सोढा । सोढुम् । सोढव्यम् । वोढा । वोढुम् । वोढव्यम् । अवर्णस्य इति किम् ? ऊढः । ऊढवान् । वर्णग्रहणं किम् ? कृतायामपि वृद्धौ यथा स्यात् । [7]उदवोढाम् । उदवोढम् । तादपि परः तपरः, [8]तपरत्वादाकारस्य ग्रहणं न स्यात् ॥

## साढ्यै साढ्वा साढेति निगमे । (११३/३८३१)

साढ्यै साढ्वा साढा इति निगमे निपात्यन्ते । 'साढ्यै समन्तात्' (मै. सं. १.६. ३१) 'साढ्वा शत्रून्' (मै.सं. ३. ८. ५) । सहेः क्त्वाप्रत्यये ओत्वाभावः । पक्षे क्त्वाप्रत्ययस्य [9]ध्यैभावः । साढा इति तृचि रूपमेतत् । निगमे इति किम् ? सोढ्वा, सोढा इति भाषायाम् ॥

---

1. जाय एहि सुवो रोहाव, रोहावहि सुवम् ह 2. पयोपवसनम् फ, नास्ति ड. 3. °शब्दस्थाने फ. 4. गूढम् फ, मूढम् ह. 5. दूरक्तम् ह. 6. आदृढम् फ. क. ड, आरूढम् ह. 7. उदवोढा उद्वोढव्यम् फ. 8. इत्यस्य इत्यधिकम् फ. 9. धैभावः क, ढचैभावः ह.